संस्कृत-वार्ता:

07/12/2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री नरेन्द्रमोदी वंदे मातरम् इति राष्ट्रगीतस्य पंचाशतधिकैकशततम-वार्षिकोत्सवस्य विशिष्ट-चर्चा श्वः लोकसभायां आरप्स्यति ।

· गोवा सर्वकार: अर्पोरा-नगरे अग्नि दुर्घटनायां, यत्र पंचविशति: जनाः मृत्युमुपगता: तस्या: दुर्घटनाया: द्रुतं दक्षं च निरीक्षणार्थं उक्तवान्।

· निर्वाचन आयोगेन प्रोक्तं यत् विशेष गहन पुनरीक्षण इत्यस्य द्वितीय चरणस्य शुभारंभानंतरं मतदातृभ्यः पञ्चाशन्कोट्यधिक-आवेदनानि वितरितानि जातानि।

· देहली-विमानस्थानकेन यात्रिकानां कृते विमानस्थानकं प्रति गमनात् पूर्वं स्वस्य विमान-स्थितिं द्रष्टुं सूचना प्रख्यापिता ।

· हॉकी-क्रीडायां, हॉकी-पुरुष-कनिष्ठ-विश्वकप उपान्त्यस्पर्धायां, भारतं-जर्मनी-देशेन सह स्पर्धिष्यते।

<u>वंदे मातरम् चर्चा</u>

वंदे मातरम् इति राष्ट्रगीतस्य पंचाशतधिकैकशततम-वार्षिकोत्सवस्य विशिष्ट-चर्चा श्वः लोकसभायां आरभेत । आधिकारिकस्रोतानां अनुसारं, प्रधानमन्त्री नरेन्द्रमोदी लोकसभायां उपवेशनस्य आरम्भो विधास्यति। गतसप्ताहे वार्ताहरान् सम्बोधयन् संसदीयकार्यमन्त्री किरेन रिजिजुः अवोचत् यत् पूर्णदिवसस्य चर्चा मध्याह्ने द्वादश वादने आरप्स्यते इति। लोकसभाध्यक्षस्य ओम बिरला वर्यस्य अध्यक्षतायां सर्वदलीयसभायां निर्णयो विहित: यत् अष्ट दिनाङ्के वंदे मातरम् इति विषये चर्चा भविष्यति, दिसम्बर मासस्य नव दिनाङ्के निर्वाचन- परिष्कार-विषये च चर्चा भविष्यति।

गोवा

अर्पोरा-नगरस्य बार्देज़्-तालुका इत्यत्र एकस्यां गोष्ठ्यां महत् अग्निप्रकोपः अभवत्, येन पंचविशतिः जनाः मृत्युमुपगताः , अन्ये च अनेके व्रणिताः अभवन्, येन स्थानीय-अधिकारिणः तत्क्षणमेव कार्यम् अकुर्वन्। अग्निः प्रकोपस्य कारणं सम्प्रति अपि अज्ञातम् अस्ति। घटनायाः द्रुतं दक्षं च निरीक्षणार्थं नियन्त्रण-कक्षानां स्थापना कृता अस्ति।

उपराष्ट्रपतिः गोवा

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः गोवाराज्यस्य अर्पोरा-नगरे ये जनाः पंचत्वे विलीनाः जाताः तेषां परिवारेभ्यः शोकं प्रकटितवान्। एकस्मिन् सामाजिकान्तर्जालीय पटले उपराष्ट्रपतिः अवोचत् यत् अग्निदुर्घटनायां प्राणहान्या सः अतीव दुःखितः अस्ति इति। श्री राधाकृष्णन् वर्यः अवदत् यत्, अस्मिन् महत् दुःखस्य क्षणे तस्य भावनाः प्रार्थनाः च शोकाकुलपरिवारेण सह सन्ति। सः सर्वेभ्यः व्रणितेभ्यः शीघ्रं स्वस्थतां प्राप्तुं अपि प्रार्थयत्।

अमितशाहः गोवा

केन्द्रीय-गृह-मन्त्री अमितशाहः गोवाराज्ये अग्निदुर्घटनायां मृतानां जनानाम् विषये शोकं प्रकटितवान्। सामाजिक अंतर्जालीय पटले सः अवदत् यत् स्थानीयप्रशासनं उद्धारकार्यम् उपशमनकार्यम् च कुर्वत् अस्ति तथा च प्रभावितानां कृते आवश्यकपरिचर्यां च प्रददाति। असौ मृतकानां परिवारेभ्यः शोकं प्रकटितवान् सममेव व्रणिताः शीघ्रं स्वस्थाः भवेयुः इति कामनाम् अकरोत्।

निर्वाचन आयोग

निर्वाचन आयोगेन प्रोक्तं यत् विशेष गहन पुनरीक्षण इत्यस्य द्वितीय चरणस्य शुभारंभानंतरं मतदातृभ्यः पञ्चाशन्कोट्यधिक-आवेदनानि वितरितानि जातानि। ध्येयास्पदं वर्त्तते यत् एस.आई.आर. इत्याख्यस्य द्वितीय चरणं गतमासस्य चतुर्दिवसे नवसु राज्येषु त्रिषु केन्द्र शासित राज्येषु च समारब्धमासीत्। एतानि छत्तीसगढ़, गोवा, गुजरात, केरल, मध्य-प्रदेश, राजस्थान, तमिलनाडु, उत्तर-प्रदेश, पश्चिम बंगाल, पुद्दुचेरी,

लक्षद्वीप, अंडमान निकोबार द्वीप समूहः च राज्यानि सन्ति। मतदातृ सूच्याः उच्चस्तरीयं पुनरीक्षणं अग्रिमे वर्षे फरवरी मासस्य चतुर्दशे दिनांके अन्तिमाया मतदातृ सूच्याः प्रकाशनेन सह समाप्तं भविष्यति।

## देहली-विमानस्थानकेन

देहली-विमानस्थानकेन यात्रिकानां कृते विमानस्थानकं प्रति गमनात् पूर्वं स्वस्य विमान-स्थितिं द्रष्टुं सूचना प्रख्यापिता। यत: इण्डिगो-विमानयानानि इदानीमपि विलम्बं सम्मुखीकर्तुं शक्नुवन्ति इति। अद्य यात्रिक-परामर्शपत्रे दिल्ली-विमानस्थानकदलं अवदत् यत् तस्य दलानि विलम्बं न्यूनीकर्तुं, सुगमयात्रानुभवं सुनिश्चेतुं च मिलित्वा कार्यं कुर्वन्तः सन्ति इति। कर्मचारिणः साहाय्यार्थं सज्जाः सन्ति इति अपि आश्वासितम्।

## प्रधानमन्त्री सशस्त्रसेना

प्रधानमन्त्री नरेन्द्रमोदी अद्य सशस्त्रसेना ध्वजदिवसमाधृत्य उक्तवान् यत् देशः साहसेन सह देशस्य रक्षणं कुर्वतां वीरसैनिकानाम् कृते कृतज्ञतां प्रकटयति। एकस्मिन् अन्तर्जालीय सामाजिकमाध्यमेन श्रीमोदी अवदत् यत् सैनिकानाम् अनुशासनं, दृढनिश्चयः, अदम्यसाहसः च राष्ट्रं सुदृढं करोति। अस्मिन् अवसरे श्री मोदिना सर्वेभ्यः नागरिकेभ्यः सशस्त्र सेना ध्वजदिवस कोषे योगदानाय अपि प्रेरणा प्रदत्ता।

## सशस्त्रसेना उपराष्ट्रपतिः

सशस्त्रसेना-ध्वजदिवसस्य अवसरे उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अद्य सशस्त्रसेना-ध्वजदिवसनिधिं प्रति स्वस्य एकमासस्य पूर्णं वेतनम् अयच्छत्। एकस्मिन् जन संचार पटले उपराष्ट्रपतिः सर्वान् नागरिकान् अपि प्रार्थयत् यत् सशस्त्र-सेना-ध्वज-दिवस-निधौ स्वेच्छया योगदानं कृत्वा राष्ट्रस्य सैनिकान् प्रति सामूहिकरूपेण कृतज्ञतां प्रकटयन्तु इति।

## उपराष्ट्रपतिः ब्रह्मकुमारी

उपराष्ट्रपतिः सी.पी. राधाकृष्णन् अद्य हरियाणायाः गुरुग्रामे ब्रह्मकुमार्याः इत्यस्याः संस्थायाः ओम् शान्ति रीट्रीट सेंटर इत्याख्यायाः रजतजयन्त्योत्सवस्य शुभारंभं कृतवान्। अस्मिन् अवसरे श्री राधाकृष्णन् अवदत् यत् ब्रह्मकुमार्या इत्यनया संस्थया मस्तिष्के, ब्रह्माण्डे, आत्मनि चेत्यादिषु विषयेषु ध्यानस्य शक्तिद्वारा गहनसत्यं प्रकाशितम् । सः अवदत् यत् ब्रह्मकुमारी इत्यस्याः संस्थायाः सतत-प्रयासैः भारते विश्वे च असंख्य-साधकानाम् कृते शान्तिः, सात्विकता, आध्यात्मिक-जागरणं च अभवत्।

## पञ्जाब सीमा-सुरक्षाबल

सीमा-सुरक्षाबलेन विगतेषु चतुर्विंशति-होरासु अमृतसर-तरनतारन-फिरोजपुरक्षेत्रेषु विभिन्नाभियानेषु पञ्जाबसीम्नि हेरोइन इति मादकद्रव्यं भुशुण्डिका, गोलिकाश्च स्वायत्तीकृताः, सहैव त्रीणि ड्रोन विमानानि च निपातितानि । गतरात्रौ ड्रोन-यन्त्रस्य सञ्चारं श्रुत्वा, सुरक्षा-कर्मिभिः एकं अन्वेषणाभियानं समारब्धम्, अस्य परिणामस्वरूपं सीमान्त-केदारे षड्-दशमलव-पञ्च-शून्य-किलोग्राममितादप्यधिकानि भारस्ययुतानि द्वादश-हेरोइन-पुटकानि निगृहीतानि । इतः पूर्वं सीम्नि नियुक्तानां प्राविधिक-प्रतिकारोपायानां प्रयोगेण सीमा-सुरक्षाबलेन पाकिस्तानात् पञ्जाब-सीम्नि मादक-पदार्थानां प्रेषणं कुर्वतां त्रयाणां ड्रोन-विमानानां निपातनं कृतम् ।

## हॉकी-क्रीडा

हॉकी-क्रीडायां, अद्य सायङ्काले चेन्नई -नगरस्य मेयर राधाकृष्णन्-हॉकी-क्रीडाङ्गणे एफ्. आई. एच्. पंचविशत्यधिक द्विसहस्रतमवर्षस्य हॉकी-पुरुष-कनिष्ठ-विश्वकप इत्यस्य उपान्त्यस्पर्धायां, भारतं-जर्मनी-देशेन सह स्पर्धिष्यते। भारतीय समयानुगुणं सायं अष्ट वादने क्रीडा आरभ्यते।

।। इति वार्ताः ।।